*AH-I/Sanskrit-101C-1/19*

# B.A. Semester I (Honours) Examination, 2018-19

# SANSKRIT

**Course ID : 10911** **Course Code : AHSNS-101C-1**

Course Title: Classical Sanskrit Literature (Poetry) & Chanda

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोनिर्देशानुसारं यावन्तः प्रश्नाः समाधेयाः तेषु अवश्यमेव यथेच्छ प्रश्न*द्वयस्य* उत्तरं संस्कृतभाषायां देवनागरलिप्या च प्रदेयम्। 2×5=10

Group-A

(किरातार्जुनीये)

प्रश्न*द्वयं* समाधेयम्। 2×2=4

(I) वनेचरः युधिष्ठिरं कीदृशीं वाचमकथयत्?

(II) 'तवानुभावोऽयम्' इत्यस्य संधिविच्छेदः विधेयः।

(III) ''परैति कार्श्यं यशसा समं वपुः''– इत्यस्य वाक्यस्य कः अर्थः? कस्मिन् प्रसंगे एषा उक्तिः विहिता?

Group-B

(कुमारसंभवे)

प्रश्न*द्वयं* समाधेयम्: 2×2=4

(I) पार्वत्याः तपश्चरणस्य स्थानं कीदृशमासीत्?

(II) ''विवेश कश्चिज्जटिलस्तपोवनम्''– कः विवेश? स च कीदृग्दर्शनम् आसीत्?

(III) ''तवानुवृत्तिं न च कर्तुमुत्सहे''– कः कथं कस्याः अनुवृत्तिं कर्तुम् अनुत्साहितः बभूव?

Group-C

(छन्दोमंजर्याम्)

*एकः* प्रश्न*ः* समाधेयः 2×1=2

(I) इन्द्रवज्रा-छन्दसः लक्षणं लिख्यताम्।

(II) छन्दोमंजरीमनुसृत्य गुरोः लक्षणं प्रदेयम्।

**2.** अधोनिर्देशानुसारं यावन्तः प्रश्नाः समाधेयाः तेषां समेषाम् एव उत्तरं संस्कृतभाषायां देवनागरलिप्या च लेख्यम्।

Group-A

(किरातार्जुनीये)

*एकस्य* श्लोकस्य व्याख्या कार्या। 5×1=5

(I) क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः।।

(II) विहाय शान्तिं नृप धाम तत् पुनः प्रसीद संधेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः।।

Group-B

(कुमारसंभवे)

*एकस्य* श्लोकस्य व्याख्या करणीया। 5×1=5

(I) तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता।।

(II) उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्।।

Group-C

(छन्दोमञ्जर्याम्)

(I) *एक*माश्रित्य टीका लेख्या। 5×1=5

(a) स्रग्धरा

(b) द्रुतविलम्बितम्

(II) अधोनिर्दिष्टेषु यथेच्छं *द्वयस्य* छन्दोनिरूपणं कार्यम् 2½×2=5

(a) किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

(b) प्रवर्ततां प्रकृतिहिताय पार्थिवः।

(c) लोको नियम्यत इवैष दशान्तरेषु।

(d) मम विरहजां न त्वं वत्से शुचं गणयिष्यसि

**3.** अधोलिखितेषु *एकस्य* प्रश्नस्य उत्तरं लेख्यम्। 10×1=10

(a) युधिष्ठिरं प्रति द्रौपद्याः भाषणं वर्ण्यताम्।

(b) पार्वतीं प्रति ब्रह्मचारिणः जिज्ञासा आलोचनीया।

(c) किरातार्जुनीयस्य प्रथमसर्गस्य विषयवस्तु लिख्यताम्।

———

*AH-I/Sanskrit-102C-2/19*

# B.A. Semester I (Honours) Examination, 2018-19

# SANSKRIT

**Course ID : 10912** **Course Code : AHSNS-102C-2**

Course Title: Classical Sanskrit Literature (Prose)

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु Group-A इत्यत: *द्वयो:* प्रश्नयो:, Group-B इत्यत: *द्वयो:* प्रश्नयो:, Group-C इत्यतश्च– *एकस्य* प्रश्नस्य उत्तरं प्रदेयम्। तेषु यथेच्छं *द्वयो:* प्रश्नयो: उत्तरमवश्यमेव संस्कृतभाषया देवनागरलिप्या च लेख्यम्:।

Group-A
(दशकुमारचरिते) 2×2=4

(i) मार्कण्डेय: केन कारणेन सुरतमञ्जरीं शप्तवान्?

(ii) ''पक्वमिदानीं त्वत्पादपद्मपरिचर्याफलम्''– केन कस्मै केन प्रसङ्गेन उक्तमिदम्?

(iii) क: आसीत् सिंहवर्मा? किमासीत् तस्य दुहितु: नाम?

Group-B
(कादम्बर्या: कथामुखे) 2×2=4

(i) 'कादम्वरी' इति कथाकाव्यस्य कथामुखे कस्य माहात्म्यं वर्णितम्? स: क आसीत्?

(ii) 'पाकशासन इवापर:'– अत्र क: पाकशासन:? तस्य हस्तकमले किं वा लक्षणमासीत्?

(iii) किं नामासीत् शूद्रकस्य राजधान्या:? राजधानीं परित: का च नदी विद्यते?

Group-C
(कादम्बर्या: शुकनासोपदेशे) 2×1=2

(i) कादम्बर्या सह शुकनासोपदेश इत्यस्य क: सम्बन्ध:?

(ii) कथं कं प्रति शुकनासस्य अयम् उपदेश:?

Group-A
(राजवाहनचरिते)

**2.** अधोनिर्दिष्टेषु किमपि सन्दर्भ*द्वयं* संस्कृतभाषया देवनागरलिप्या च व्याख्येयम्। 5×2=10

(a) अद्यैव क्षपावसाने विवाहनीया राजदुहिता।

(b) पापे भजस्व लोहजातिमजातचैतन्या सती इति।

(c) देव! दीयतामनुग्रहार्द्रचित्तम्। अहमस्मि सोमरश्मिसम्भवा सुरतमञ्जरी नाम सुरसुन्दरी।

Group-B

(कादम्बर्या कथामुखे)

**3.** अधोलिखितयोः सन्दर्भयोः *एकस्य* व्याख्या संस्कृतभाषया देवनागरलिप्या च क्रियताम्। 5×1=5

(a) अतिचिरकाललग्नमनिक्रान्तकुतृपतिसहस्रसम्पर्ककलङ्कमिव क्षालयन्तो यस्य विमले कृपणधाराजले चिरमुवास राजलक्ष्मीः।

(b) यस्य च हृदयस्थितानपि पतीन् दिधक्षुरिव प्रतापानलो वियोगिनीमपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल।

Group-C

(कादम्बर्याः शुकनासोपदेशे)

**4.** अधोलिखितयोः सन्दर्भयोः *एकस्य* व्याख्या संस्कृतभाषया देवनागरलिप्या च क्रियताम्। 5×1=5

(a) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषप्रकृतिः।

(b) मनसा देवताध्यरोपणप्रतारणासम्भूतसम्भावनोपहताश्चान्तःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं सललाटमाशङ्कते।

**5.** अधोनिर्दिष्टेषु *एकस्य* प्रश्नस्य उत्तरं लेख्यम्। 10×1=10

(a) क आसीत् चण्डवर्मा? तस्य दुराचारः उपवर्ण्यताम्। तस्य कीदृशी अन्तिमा परिणतिः आसीत्?

(b) कादम्बर्याः कथामुखस्य सारांशः लेख्यः।

(c) स्वपाठ्यांशमवलम्ब्य दण्डिनः रचनारीतिः संक्षेपेणालोच्यताम्।

# B.A. Semester I (Honours) Examination, 2018-19

## SANSKRIT

**Course ID : 10914** **Course Code : AHSNS-103GE-1**

Course Title: Drama & Grammar

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

Group-A

**1.** यथेच्छ*मेकस्य* सप्रसङ्गव्याख्या संस्कृतेन देवनागरीलिप्या च लेख्या। 5×1=5
*যে কোনো একটির* প্রসঙ্গ সহিত সংস্কৃত ভাষায় ও দেবনাগরী লিপিতে ব্যাখ্যা লেখো।

(a) असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मन:।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करणप्रवृत्तय:।।

(b) बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत:।

**2.** यथेच्छ*मेकस्य* संस्कृतेन देवनागरीलिप्या च भावसम्प्रसारणं कार्यम्। 5×1=5
*যে কোনো একটির* সংস্কৃতে ও দেবনাগরী লিপিতে ভাবসম্প্রসারণ করো।

(a) भवितव्यानां द्वाराणि भवन्ति सर्वत्र।

(b) कामी स्वतां पश्यति।

**3.** यथेच्छ*मेक:* प्रश्न: समाधेय:। 10×1=10
*যে কোনো একটি* প্রশ্নের উত্তর দাও ঃ

(a) अभिज्ञानशकुन्तले गजप्रवेशस्य नाटकीयता प्रतिपादनीया।
অভিজ্ঞান-শকুন্তলে হস্তী-প্রবেশের নাটকীয়তা প্রতিপাদন করো।

(b) नाट्यगतिविस्तारे राजसभामध्ये शकुन्तलापरित्यागस्य गुरुत्वं विश्लेषणीयम्।
নাটকীয়গতি বিস্তারে রাজসভায় শকুন্তলা পরিত্যাগের গুরুত্ব বিশ্লেষণ করো।

(c) कुलपते: कण्वस्य चरित्रं प्रख्यातव्यम्।
কুলপতি কণ্বের চরিত্র বর্ণনা করো।

**4.** अधोनिर्दिष्टेषु द्वयोरुत्तरं प्रदेयम्। 2×2=4
নিম্নলিখিত *যে কোনো দুটি* প্রশ্নের উত্তর দাও ঃ

(a) शिवस्य अष्टमूर्त्तय: का:?
শিবের আটটি মূর্ত্তি কী কী?

(b) राजमातु: वार्तावाहक: क:? तेन क: सन्देश: आनीत:?
রাজমাতার বার্তা বাহক কে এবং তিনি কী বার্তা এনেছিলেন?

(c) शकुन्तलावण्ये इत्यस्य तात्पर्यं किम्?

শকুন্তলাবণ্য এর তাৎপর্য কী?

Group-B

**5.** अधस्स्थितेषु *त्रयाणां* रेखाङ्कितपदानां सकारणविभक्तिः निर्णेयाः। 2×3=6

নিম্নলিখিত বাক্যগুলির মধ্যে তিনটি বাক্যের রেখাঙ্কিত পদগুলির সকারণ কারক বিভক্তি নির্ণয় করো।

(a) गोषु कृष्णा बहुक्षीरा।

(b) पादेन खञ्जः।

(c) व्याघ्रात् बिभेति।

(d) ग्रामं निकषा नदी।

(e) नमः शिवाय।

**6.** (i) अधोनिर्दिष्टेषु *द्वयोः* सविग्रह-समास-नाम लेख्यम् 2×2=4

*যে কোনো দুটির* সবিগ্রহ সমাসের নাম লেখো।

(a) प्रत्यक्षाभिः

(b) वीणापाणिः

(c) राजपुरुषः

(ii) अधस्स्थयोः *एकस्य* सन्धिः कार्यः। 1×1=1

একটির সন্ধি করো।

(a) ते + एव

(b) निः + रवः

**7.** यथेच्छं *पञ्चकस्य* परिनिष्ठितरूपं लेख्यम्। 1×5=5

*পাঁচটির* পরিনিষ্ঠিত রূপ লেখো।

(a) आ – हृ + ल्यप्

(b) वस् + क्त्वा

(c) लक्ष्मी + मतुप्

(d) गम् + तुमुन्

(e) कृ + शानच्

(f) दशरथ + इञ्

(g) दृश् + क्त्वा

(h) बल + मतुप्

———————

***AP-I/Sanskrit-101C-IA/19***

# B.A. Semester I (General) Examination, 2018-19

# SANSKRIT

**Course ID : 10918** **Course Code : APSNS-101C-IA**

Course Title: Sanskrit Drama and Language

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

Group-A

**1.** यथेच्छम् *एकस्य* सप्रसङ्गव्याख्या संस्कृतेन देवनागरलिप्या च लेख्या। 5×1=5

প্রসঙ্গ উল্লেখপূর্বক সরল সংস্কৃতে ও দেবনাগরী লিপিতে *যে কোনো একটির* ব্যাখ্যা করো।

(a) सरसिजमनुबिद्धं शैवालेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

(b) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यन्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।

**2.** यथेच्छम् *एकस्य* संस्कृते देवनागरलिप्या च भावसम्प्रसारणं कार्यम्। 5×1=5

প্রসঙ্গ উল্লেখপূর্বক সরল সংস্কৃতে ও দেবনাগরী লিপিতে *যে কোনো একটির* ভাবসম্প্রসারণ করো।

(a) आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्।

(b) स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति।

**3.** यथेच्छम् *एकः* प्रश्नः समाधेयः। 10×1=10

*যে কোনো একটি* প্রশ্নের উত্তর দাও ঃ

(a) 'तत्राप्यङ्कश्चतुर्थः स्यात् तत्र श्लोकचतुष्टयम्'– इति कथनस्य साधु विवेचनं कर्तव्यम्।

তত্রাপ্যঙ্কশ্চতুর্থঃ স্যাৎ তত্র শ্লোকচতুষ্টয়ম্'— এইরূপ কথনের উত্তম পর্যালোচনা করো।

(b) शकुन्तलाया: पतिगृहयात्रा वर्णनीया।
শকুন্তলার পতিগৃহযাত্রা বর্ণনা করো।

(c) शकुन्तलाया: दुष्यन्तकर्तृकप्रत्याख्यानदृश्यं वर्णनीयम्।
দুষ্যন্তকর্তৃক শকুন্তলার প্রত্যাখ্যানদৃশ্য বর্ণনা করো।

**4.** अधोनिर्दिष्टेषु *द्वयो:* प्रश्नयो: उत्तरं लेख्यम्। 2×2=4
নিম্নলিখিত প্রশ্নগুলির মধ্যে *দুটির* উত্তর লেখো ঃ

(a) अभिज्ञानशकुन्तलनाटके विदूषकस्य नाम किम् आसीत्? कस्मिन् कस्मिन् अङ्के तस्य उपस्थिति: दृश्यते?
অভিজ্ঞানশকুন্তলনাটকে বিদূষকের কী নাম? কোন কোন অঙ্কে তার উপস্থিতি দেখা যায়?

(b) दुर्वासा शकुन्तलायै कथं कम् अभिशापं दत्तवान्?
দুর্বাসা শকুন্তলাকে কেন কী অভিশাপ দিয়েছিলেন?

(c) प्रियंवदा का? प्रियंवदा इति पदस्य क: अर्थ:?
প্রিয়ংবদা কে? প্রিয়ংবদা পদের অর্থ কী?

## Group-B

(कारके प्रश्ना:)

(কারকের প্রশ্ন)

**5.** अधस्थितेषु *त्रयाणां* रेखाङ्कितपदानां सकारणविभक्ति: निर्णेया। 2×3=6
নিম্নলিখিত বাক্যগুলির মধ্যে *যে কোনো তিনটি* রেখাঙ্কিত পদের কারণ উল্লেখপূর্বক বিভক্তি নির্ণয় করো।

(a) राम: <u>शोकेन</u> क्रन्दति।

(b) <u>कुण्डलाय</u> हिरण्यम्।

(c) राम: <u>विद्यालयं</u> गच्छति।

(d) वृक्षात् <u>पुष्पाणि</u> पतन्ति।

(e) <u>व्याघ्राद्</u> बिभेति।

**6.** (a) अधोनिर्दिष्टेषु *द्वयो:* सविग्रहसमासनाम लेख्यम्। 2×2=4
যে কোনো *দুটির* বিগ্রহবাক্যসহ সমাসের নাম লেখো।

(i) दुर्भिक्षम्

(ii) भूतवलि:

(iii) नीलोत्पलम्

(b) अधस्स्थयो: *एकस्य* सन्धि: कार्य:। 1×1=1
যে কোনো *একটির* সন্ধি করো।

(i) गङ्गा + उदकम्

(ii) पुन: + रमते

**7.** यथेच्छं *पञ्चकस्य* परिनिष्ठितरूपं लेख्यम्। 1×5=5

*যে কোনো পাঁচটির* পরিনিষ্ঠিত রূপ লেখো।

(a) जि + क्त

(b) आ-नी + ल्यप्

(c) वद् + शतृ

(d) दृश् + तुमुन्

(e) दशरथ + इञ्

(f) लघु + अण्

(g) दा + क्त्वा

(h) लक्ष्मी + मतुप्

*ACP-I/Sanskrit-103C-MIL-1/19*

# B.A. Semester I (Honours/General) Examination, 2018-19

## SANSKRIT

**Course ID : 10919** **Course Code : ACPSNS-103C-MIL-1**

Course Title: MIL-1

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु परिच्छेदेषु *एकस्य* परिच्छेदस्य पाठपूर्वकं प्रश्नानाम् उत्तराणि लिखतु। 10×1=10

(a) अहमेकदा दक्षिणारण्ये चरन्नपश्यम् – एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते – भोः भोः पान्थाः! इदं सुवर्णकङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम् – भाग्येनैतत् सम्भवति। तन्निरुपयामि तावत्। प्रकाशं ब्रूते – कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत् – कथं मारात्मके त्वयि विश्वासः? व्याघ्र उवाच – शृणु रे पान्थः प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद् धार्मिकेणाहमादिष्टः – दानधर्मादिकं चरतु भवान् इति।

(i) व्याघ्रस्य हस्ते किमासीत्? 1

(ii) व्याघ्रः किं दातुमिच्छति स्म? 1

(iii) पान्थः कुत्र व्याघ्रमपश्यत्? 1

(iv) पान्थः व्याघ्रं किमपृच्छत्? 2

(v) व्याघ्रेण किमुक्तम् 3

(vi) कथं पान्थः लोभाकृष्टः अभवत्? 2

(b) कस्यचिन्नृपस्य महिषीद्वयमासीत्–सुभगा दुर्भगा च। राजगृहे सुभगायाः राज्ञ्याः परमादरः प्रयत्नश्च। सुभगा महिषी सप्तशाले प्रासादे तिष्ठति। परिचारिकानां सप्तशती तां सेवते, चरणयुगलं प्रक्ष्याल्य अलक्तकरागेण तद् रञ्जयति, केशं विरचयति च। उद्यानसप्तकस्य सप्तभाजनपूर्णानि कुसुमानि, तेन कुसुमचयेन कनीयसी महिषी स्रजं ग्रन्थाति। सुभगा सहिषी खलु नृपस्य जीवनम्। अन्यतो दुर्भगा सहिषी ज्यायसी, तस्या भृशमनादर अयत्नश्च। राजा विषनयनेन तां पश्यति। गृहमेकं तस्यै प्रदत्तं तदपि भग्नम्, एका दासी प्रदत्ता, सापि मूका बधिरा च। परिधानाय जीर्णा शाटिका, शयनाय छिन्ना च कन्था। तस्या गृहं राजा दिनमेकमागच्छति, मुहूर्तकमुपविशति, वचनमेकमुक्त्वा निर्गच्छति। सुभगा तु कनीयसी महिषी, तस्या एव गृहं भुपतिः सम्वत्सरमधितिष्ठति।

(i) राजा कनीयस्या महिष्या सह कीदृशं व्यवहारं करोति? 2

(ii) सुभगा महिषी केन प्रकारेण दिनं यापयति? 2

(iii) 'राजा विषनयनेन तां पश्यति' - वाक्यस्य वाच्यपरिवर्तनं करणीयम्। 2

(iv) राज्ञः महिषीद्वयष्य नामनी के? तयोः मध्ये कस्यां राज्ञः अधिकादरः? 2

(v) '<u>मुहूर्त</u>कमुपविशति' - अत्र रेखाङ्कितपदे कथं का विभक्तिः? 2

(c) एकः नृपतिः बभूव। स निःसन्तान आसीत्। एकदा मृगयायै गत्वा सः सन्यासिनमेकं प्राप्तवान्। तस्य सन्यासिनः पुरतः यदा सः नृपतिस्तस्य निःसन्तानत्वं वर्णयामास तदा तेन सन्यासिना तस्मै किञ्चित् वृक्षवीजं दत्वा एवमुक्तम् - 'वृक्षवीजमिदं तदीयभार्या भक्षयतु, तेन तस्याः द्वौ पुत्रौ भविष्यतः, परन्तु तयोः प्रथमः पुत्रः मह्यं देयः।' राज्ञा तत्सर्वमङ्गीकृत्य वृक्षवीजं नीत्वा गृहं प्रत्यागतम्। गृहं प्राप्य च तदत्तुं भार्यायै प्राददात्। कियद्दिनानन्तरं महिषी यथाक्रमं पुत्रद्वयं जनितवती। शनैः शनैः पुत्रद्वयमवर्धत, परस्परं तौ प्रीतिमाप्नुवन्तौ मिलित्वा च क्रीडामकुरुताम्। तयोः रूपमवलोक्य राजा आनन्दाप्लुतो जातः, एवं सन्यासिने दत्तवाक्यं तेन विस्मृतम्। अन्यत्र सः सन्यामी दिनादिकं गणयित्वा समयं यापितवान्। तयोः बालकयोः प्रथमस्तु षोडशवर्षीयः द्वितीयश्च पञ्चदशवर्षीयः यदाभवताम् तदा एकदा सः सन्यासी राजपुरमुपस्थितवान्, अपि च नृपतिं पूर्वमेव दत्तवचनं स्मारयित्वा ज्यायांसं पुत्रमयाचत। निरुपायो भूत्वा सः राजा तदीयज्यायांसं पुत्रं सन्यासिने समर्पयति स्म।

(i) वने राज्ञः सन्यासिनः च वार्तालापं स्वभाषया लिखतु। 2

(ii) कदा सन्यासी राजसकाशमुपस्थितवान्? 2

(iii) 'एकः नृपतिः बभूव' - इत्यस्य वाक्यस्य वाच्यान्तरं विधेयम्। 2

(iv) वीजभक्षणस्य फलं किमासीत्? 2

(v) पुत्रद्वयं कथं कालं यापयति स्म? 2

**2.** द्वयोः मध्ये *एकस्य* शब्दस्य रूपाणि लिखतु। 5×1=5

(a) साधुशब्दः

(b) गुणिन्शब्दः

**3.** त्रिषु *द्वयोः* धात्वोः रूपाणि लिखतु। 5×2=10

(a) दा-धातोः लट्लकारे लृट्लकारे च रूपाणि लिखतु।

(b) गम्-धातोः लङ्लकारे लोट्लकारे च रूपाणि लिखतु।

(c) सेव्-धातोः लट्लकारे लृट्लकारे च रूपाणि लिखतु।

**4.** अधस्तनेषु रेखाङ्कितेषु पदेषु *पञ्चनां* सकारण-विभक्तिनिर्देशं कुर्वन्तु। 2×5=10

(a) अश्वः मन्दं धावति।

(b) गुरोः शास्त्रम् अधीते।

(c) मासं व्याकरणमपठत्।

(d) कुण्डलाय हिरण्यम्।

(e) बालकः कटे आस्ते।

(f) सूर्ये उदिते पद्मं प्रकाशते।

(g) ग्रामं परितः नदी।

(h) पिता पुत्रं विद्यालयं गमयति।

**5.** अधोनिर्दिष्टेषु प्रश्नेषु *पञ्च*प्रश्नाः समाधेयाः। 1×5=5

(a) कृ + शानच् इत्यत्र किं परिनिष्ठितं रूपम्?

(b) प्र-दा + ल्यप् इत्यत्र किं रूपम्?

(c) दृश + तव्य इत्यत्र किं रूपम्?

(d) गातुम् इत्यत्र कः धातुः कः च प्रत्ययः?

(e) दर्शनम् इत्यत्र कः धातुः कः च प्रत्ययः?

(f) करणीयम् इत्यत्र कः धातुः कः च प्रत्ययः?

(g) शिष्यः इत्यत्र कः धातुः कः च प्रत्ययः?

*अथवा,*

अधोनिर्दिष्टेषु प्रश्नेषु *पञ्च*प्रश्नाः समाधेयाः। 1×5=5

(a) सेव् + शानच् इत्यत्र किं परिनिष्ठितं रूपम्?

(b) आ + गम् + ल्यप् इत्यत्र किं रूपम्?

(c) कृ + तव्य इत्यत्र किं रूपम्?

(d) द्रष्टुम् इत्यत्र को धातुः कः च प्रत्ययः?

(e) पठनीयम् इत्यत्र को धातुः कः च प्रत्ययः?

(f) गच्छन् इत्यत्र को धातुः कश्च प्रत्ययः?

(g) स्नात्वा इत्यत्र को धातुः कश्च प्रत्ययः?

(h) उक्तवा इत्यत्र को धातुः कश्च प्रत्ययः?

---